3. चतुर्विंशतिः साहस्त्री नाम्ना कः ग्रन्थः विख्यातः?

रामायणम्

4. रामायणे कति काण्डानि सन्ति?

सप्त काण्डानि

5. रामायणस्य प्रधान रसः कः

करूण रसः

6. शत–साहस्त्री संहिता नाम्ना कः ग्रन्थः विख्यात?

महाभारतम्

7. कार्ष्णवेदः कः कथ्यते? अस्य रचनाकारस्य च किम् नाम् आसीत्?

'महाभारतम्' इति ग्रन्थः कार्ष्णवेदः कथ्यते।

अस्य रचनाकारस्य वेदव्यासस्य (श्रीकृष्णद्वैपायान) वर्तते।

8. महाभारतस्य कथायाः विकासक्रमेण किम्–किम् नाम आसीत्

जय, भारतम्, महाभारतम्

9. वर्तमान महाभारतस्य कथा कति पर्वसु विभक्ता?

अष्टादश (18 पर्वषु)

10. श्रीमद्भगवद्गीता महाभारतस्य कस्मिन् पर्वणि विद्यते?

भीष्म पर्वणि

11. पञ्चमः वेदः कः कथ्यते?

महाभारतम्

12. 'बृहत्त्रयी' इति नाम्ना कानि काव्यानि प्रसिद्धानि सन्ति

(1) किरातार्जुनीयम् (2) शिशुपालवधम् (3) नैषधीयचरितम्

13. लघुत्रयी का कथ्यते?

(1) रघुवंशम् (2) कुमारसम्भवम् (3) मेघदूतम्

14. अश्वघोष विरचित ग्रन्थानां नामानि लिखत्।

(1) बुद्ध चरितम् महाकाव्यम (2) सौन्दरानंदन महाकाव्यम् (3) शाश्वती पुत्रप्रकरणम् (शारिपुत्रप्रकरणम्)

CBEO BHINDER

15. बुद्धचरितमहाकाव्ये कति सर्गाः सन्ति?

28 सर्गाः

16. बुद्धचरितमहाकाव्यस्य आधारग्रन्थः कः?

ललित–विस्तर (बौद्धग्रन्थः)

17. सौन्दरनंदमहाकाव्ये कति सर्गाः सन्ति?

अष्टादश (18) सर्गाः

18. कालिदासस्य महाकाव्यद्वयोः नाम लिखत्।

(1) रघुवंशम् (2) कुमारसंभवम्

19. कालिदास विरचिते खण्डकाव्ये के स्तः?

(1) ऋतुसंहारम् (2) मेघदुतम्

20. कालिदास विरचितानि नाटकानि कति सन्ति?

त्रीणि नाटकानि सन्ति (1) मालविकाग्निमित्रम् (2) विक्रमोर्वशीयम् (3) अभिज्ञानशाकुन्तलम्

21. कालिदासाय कः अलकारः प्रियः वर्तते?

उपमा अलंकार

22. रघुवंशमहाकाव्ये–कुमार सम्भव महाकाव्ये कति सर्गा सन्ति?

सन्ति रघुवंशे–एक्रोन विशंति (19) सर्गाः कुमार सम्भवे – सप्तदशक (17) सर्गाः सन्ति।

23. किराताजुनीयस्य रचयिता कः?

महाकविः भारविः

24. अर्थगौरवाय कः कवि प्रसिद्धः अस्ति?

महाकविः भारविः

25. किराताजुनीय महाकाव्ये कति सर्गाः सन्ति?

अष्टादश (18) सर्गाः सन्ति

26. मल्लिनाथस्य टीकायाः किम् नाम?

घण्टापथः

27. रावणवधम् इति महाकाव्यस्य रचयिता कः?

महाकविः भट्टिः

28. भट्टिकाव्यस्य (रावणवधम्) कथायाः मूलाधार ग्रन्थः कः?

CBEO BHINDER

आदिकाव्यं रामायणम्।

29. जानकी हरणम् कस्य रचना अस्ति?
महाकविः कुमारदासः

30. शिशुपालवधम् इति महाकाव्यस्य रचयिता कः?
महाकवि माघः

31. माघस्य जन्म कुत्र अगवत्?
राजस्थान प्रदेशस्य भीनमालनगरे।

32. शिशुपालवध महाकाव्ये कति सर्गाः सन्ति?
विंशति (20) सर्गाः।

33. माघे सन्ति त्रयो गुणाः'' इत्युक्त्यानुसारणे माघे त्रयः गुणाः के सन्ति?
(1) उपमा (2) अर्थगौरवम् (3) पदलालित्यञ्च

34. हरविजयम् इति महाकाव्यस्य रचयिता कः?
महाकवि रत्नाकरः

35. संस्कृत महाकाव्येषु सर्वाधिकंक बृहत्कायं महाकाव्यं किम्?
हरविजयम् महाकाव्यम्

36. धर्मशर्माभ्युदय महाकाव्यस्य रचयिता कः?
जैन महाकविः हरिश्चन्द्रः

37. राघव पाण्डवीयम् इति महाकाव्यस्य रचयिता कः?
कविराजः माधवभट्टः

38. नैषधीयचरितम् महाकाव्ये किं वर्णितमस्ति?
नलः दमयन्त्ययोः प्रेमकथा वर्णिता

39. नैषधीयचरितस्य रचयिता कः?
महाकविः श्री हर्षः

40. नैषधीय चरिते कति सर्गाः सन्ति?
द्वाविशंतिः (22) सर्गाः सन्ति।

41. 'सेतुबन्ध–महाकाव्यम्' कस्य महाकाव्यं अस्ति?

CBEO BHINDER

महाकवि प्रबरसेन

42. श्री कण्ठचरित–महाकाव्यस्य रचयिता कः?

महाकवि मंखः

43. न्वसाहसांक चरितस्य रचयिता कः?

पद्म गुप्त परिमलः

44. विक्रमाक देवचरित महाकाव्यस्य रचयिता कः?

महाकविः बिल्हणः

45. राजतरंगिणी महाकाव्यस्य रचयिता कः?

महाकवि–कल्हण

46. सोमपाल विजय महाकाव्यस्य रचयिता कः?

महाकवि जल्हणः

47. हम्मीर महाकाव्यस्य रचयिता कः?

महाकवि नयचन्दसुरिः

48. दूतकाव्य परम्परायाः प्रथमः ग्रन्थः कः?

मेघदूतः

49. मेघदूतकाव्ये कति श्लोकाः सन्ति?

121 श्लोकाः सन्ति।

50. घटकर्पर काव्यस्य रचयिता कः?

महाकविः घटकर्परः।

51. गाथा–सप्तशती इति काव्यस्य रचयिता कः?

महाकवि–हालः (सातवाहन)

52. अमरूकशतकस्य रचयिता कः?

अमरूक महाकविः

53. गीत गोविन्दस्य रचयिता कः?

महाकविः जयदेवः

54. गंगालहरी इति काव्यस्य रचयिता कः?

पण्डितराज–जगन्नाथः

CBEO BHINDER

55. चण्डीशतकस्य रचयिता कः?

महाकवि बाणभट्टः

56. सूर्यशतकस्य रचयिता कः?

मयूरभट्टः

57. गद्यकाव्यस्य प्रथमः लेखकः कः मन्यते?

सुबन्धुः

58. वासवदत्ता इति गद्यकाव्यस्य रचयिता कः?

सुबन्धुः

59. दशकुमार चरितस्य रचयिता कः?

महाकविः दण्डी

60. धूर्तो का रोमांस इति नाम्ना कः ग्रन्थः कथ्यते?

दशकुमारचरितं कथ्यते।

61. संस्कृत–गद्य–साहित्ये कस्य महाकवेः सर्वोच्चस्थानं वर्तते?

महाकवेः बाणभट्टस्य

62. हर्षचरितस्य रचयिता कः?

महाकवि बाणभट्टः

63. संस्कृत साहित्यस्य सर्वश्रेष्ठं गद्यकाव्यं किम्?

कादम्बरी

64. अभिनव बाणः इत्युपाधिना कः अलंकृत?

पं. अम्बिकादत्त व्यासः

65. शिवराज विजयस्य रचयिता कः?

पं. अम्बिकादत्त व्यासः

66. नाट्यशास्त्रस्य रचयिता कः?

भरतमुनिः

67. भासस्य कति नाटकानि प्राप्यन्ते तेषाम् नामानि लिखत –

CBEO BHINDER

भासस्य त्रयोदश नाटकानि प्राप्यन्ते – (1) प्रतिमानाटकं (2) अभिषेक नाटकं (3) मध्यम व्यायोगः (4) कर्णभारः (5) पञ्चरात्रम् (6) उरूभङ्म् (7) बालचरितं (8) दूतवाक्यं (9) दूतघटोत्कच (10) प्रतिज्ञायौगन्धरायणं (11) स्वप्नवासवदतम् (12) अविभारकम् (13) चारूदत्तम्

68. 'मृच्छाकटिकम्' इत्यस्य रचयिता कः?

शूद्रकः

69. कालिदासस्य सर्वस्वं किम् अस्ति?

अभिज्ञानशाकुन्तलम्

70. काव्येषु किम् रम्यम्?

काव्येषु नाटकं रम्यम्

71. नाटकेषु रम्या कः

नाटकेषु शकुन्तला रम्या।

72. सम्राट हर्षवर्द्धन विरचितानि रूपकाणि कति सन्ति?

त्रीणी रूपकाणि सन्ति – (1) प्रियदर्शिका (2) रत्नावली (3) नागानन्दं नाटकम्

73. मुद्राराक्षसनाटकस्य रचयिता कः?

विशाखदतः

74. संस्कृत नाट्य साहित्ये कुटनीति प्रधान (वीररसप्रधानं) नाटकं कः अस्ति?

मुद्राराक्षसम्

75. संस्कृत साहित्ये नायिका रहितं नाटकं किम्

मुद्राराक्षसम्

76. वेणी संहारम् इति नाटकस्य रचयिता कः?

भट्टनारायण

77. भवभूति विरचितानि कति नाटकानि सन्ति?

त्रीणी नाटकानि सन्ति – (1) महावीर चरितम् (2) मालतीमाधवम् (3) उत्तरराम चरितम्

78. उत्तरराम चरिते प्रधानः रसः कः?

करूणरसः

79. कस्मिन् भवभूतिः विशिष्यते?

उतरराम चरिते

CBEO BHINDER

80. कारूण्यं कः एव तनुते?

कारूण्यं भवभूतिः एव तनुते।

81. अनर्घराघवम् इति नाटकस्य रचयिता कः?

महाकविः मुरारिः

82. आश्चर्य चूडामणिः इति नाटकस्य रचयिता कः?

शक्ति भद्रः

83. बाल रामायण नाटकस्य रचयिता कः?

राजशेखर

84. कर्पूरमंजरी इति रूपकस्य रचयिता कः?

राजशेखरः

85. हनुमाननाटकस्य रचयिता कः?

दामोदर मिश्रः

86. कुन्दमाला इति नाटकस्य रचियता कः?

दिङ्नागः

87. प्रबोध चन्द्रोदयः इति नाटकस्य रचयिता कः?

कृष्णमिश्रः

88. प्रसन्नराघवम् नाटकस्य रचयिता कः?

जयदेवः

89. लटकमेलक प्रहसनस्य रचयिता कः?

कविराजः शंखराजः

90. पञ्चतन्त्रस्य रचयिता कः

पं. विष्णु शर्मा

91. पंचतन्त्रे कति तन्त्राणि अध्यायाः वा सन्ति?

पञ्च अध्यायाः सन्ति (1) मित्रभेदः (2) मित्रलाभः (3) काकोलूकीयम् (4) लब्धप्रणाशः (5) अपरिक्षिकारकम्

92. हितोपदेशस्य रचयिता कः?

नारायण पण्डितः

93. वृहत्कथायाः रचयिता कः?

CBEO BHINDER

गुणाढ्यः

94. कथा सरितसागरस्य रचयिता कः?

सोमदेव भट्टः

## आधुनिक संस्कृत साहित्य परिचयः

1. ईश्वर विलासः केन रचितः?
सीताराम भट्ट पर्वणी करेण।

2. 'कच्छवंश' केन रचितः?
राजवैद्येन

3. मानवंशम् केन रचितम्?
सूर्यनारायण शास्त्रिणा।

4. 'हरनामामृतम्' महाकाव्यस्य रचयिता कः?
पण्डित विद्याधरशास्त्री

5. 'श्री महावीर सौरभम्' कस्य रचना अस्ति?
आचार्य मधुकरशास्त्री

6. 'लेलिनामृतम्' महाकाव्यस्य रचयिता कः?
श्री पद्मदत्त ओझा

7. 'जरासन्धवधम्' कस्य महाकाव्यम्?
श्री गोस्वामी हरिरायस्य

8. 'मोहभंग' महाकाव्यस्य रचयिता कः?

डॉ.रसिक बिहारी जोशी

9. 'महारथी' महाकाव्यस्य रचयिता कः?

पण्डित गुलाबचन्द्र बुलेट

10. 'चन्द्रमहीपति' उपान्यासस्य रचयिता कः?

श्री निवासाचार्यः

11. 'यात्रा विलासम्' उपन्यासस्य लेखकः कः?

पं. नवल किशोर शास्त्री कांकरः।

12. 'प्रमेय परिजातस्य' रचयिता कः अस्ति?

गिरिधर शर्मा चतुर्वेदी

13. 'आदर्श दम्पत्तिः' उपन्यासः केन रचितः?

वृद्धिचन्द्र शास्त्रिणा

14. विश्वम्भरा पत्रिकायाः सम्पादनं केन कृतम्?

CBEO BHINDER

डॉ. प्रभाकर शास्त्रिणा

15. 'दायरे' इति धारावाहिक माध्यमेन कः बहुचर्चित?

डॉ. हरिराम आचार्यः

16. डॉ. रसिक बिहारी जोशी केन पुरस्कारेण सम्मानितः?

श्री हारितः ऋषिः पुरस्कारेण।

17. 'आत्मवेदना' कथायाः रचयिता कः?

डॉ. प्रभाकर शास्त्री।

18. निम्नलिखितानां कृतीनां कृतिकाराः के? नाम निर्देशं कुरूत

(i) बाल शाकुन्तलम्, भारत विजयम्, हरिचन्द्र नाटकम् – गोविन्द प्रसाद शास्त्री

(ii) दुर्बल बलम्, पूर्णानन्दम्, कलिपलायनम् – श्री विद्याधर शास्त्री

(iii) कर्तव्य परायणता, धनिक धूर्तता, प्रेमपरीक्षा – डॉ. नारायण शास्त्री कांकरः

(iv) साहित्य लहरी, कर्मक्षेत्रे, चित्तौड़ सिंह – डॉ. हरिराम आचार्यः

(v) इन्द्रविजय, कादम्बिनी, अहोरात्रम् – पं. मधुसुदन ओझा

# छन्दोज्ञानम्

**प्र.1 छन्दस्य परिभाषा लिखत्।**

**उत्तरम्– नियतवर्णानां मात्राणां वा नियमबद्धं वाक्यं वाक्य समूहो वा 'छन्दः' शब्देन अभिधीयते।**

**प्र.2 वर्णछन्दसः अपर नाम किम् अस्ति?**

**उत्तरम्– वर्णिक छंदः (वृतम्)**

**प्र.3 मात्रिकछन्दसः अपर नाम् किम्अस्ति ?**

**उत्तरम्–''जाति'' इति अस्ति।**

**प्र.4 गुरूः कः स्वरः भवति।**

CBEO BHINDER

उत्तरम्– गुरूः दीर्घः स्वरः भवति

प्र.5 छन्दशास्त्रे ह्रस्वस्वर कः कथ्यते ?

उत्तरम्–लघुः कथ्यते।

प्र.6 गणः कः कथ्यते ?

उत्तरम्–त्रयाणां वर्णानां समूहः गणः कथ्यते।

प्र.7 गणाः कति भवन्ति ?

उत्तरम्– गणाः अष्टौ भवन्ति।

प्र.8 छन्दशास्त्रे यतिः शब्दस्य कः अर्थ अस्ति ?

उत्तरम्– छन्दशास्त्रे यतिः शब्दस्य अर्थः ''विरामः'' इति भवति।

प्र.9 मगणस्य स्वरूपं लिख्यताम्।

उत्तरम्–मगणस्य स्वरूपं ''मातारा'' ऽऽऽ अस्ति।

प्र.10 कस्मिन गणे सर्वे वर्णाः लघवः भवन्ति।

उत्तरम्– नगणे सर्वे वर्णाः लघवः भवन्ति।

प्र.11 गणस्वरूपस्य लघुसूत्रं लिख्यताम्।

उत्तरम्–गणस्वरूपस्य लघुसूंत्र ''यमाताराजभानसलगाः'' इति अस्ति।

प्र.12 ''सम्बन्धः'' इत्यस्मिन शब्दे कः गणः ?

उत्तरम्–सम्बन्धः इति शब्दे ''मगणः'' अस्ति।

प्र.13 प्रतिपादं वर्णानां गणना कस्मिन छंदसि भवति?

उत्तरम्–प्रतिपादं वर्णानां गणना वर्णिक छंदसि भवति।

CBEO BHINDER

प्र.14 छन्दशास्त्रस्य प्रणेता कः अस्ति ?

उत्तरम्– पिङ्गलाचार्यः अस्ति।

प्र.15 उपेन्द्रवज्राछन्दसः लक्षणं लिख्यताम्।

उत्तरम्–उपेन्द्रवज्रा जतजास्ततौ गौ।

प्र.16 अधोलिखिते कस्यापि एकस्य छन्दसः लक्षणं उदाहरणं च लिख्यताम्।

(अ) अनुष्टुप (ब) वसन्ततिलका

उत्तरम्–वसन्त तिलका

लक्षणम्– उक्ता वसन्ततिलका तभजाजगौ गः।

उदाहरणम्– पापान्विारयति योजयते हिताय

गुह्यं निगूहति गुणान्प्रकटीकरोति।

आपद्गतं च न जहाति ददाति काले

सन्मित्रलक्षणमिदं प्रवदन्ति सन्तः।

प्र.17 निम्नलिखित– कस्यापि एकस्याः पंक्तेः गणचिह्नप्रदर्शयन् छन्दसः नामोल्लेखं कुरूत–

1. महिम्नामेतस्मिन् विनयशिशिरो मौग्ध्यमसृणोः।
2. इतर–पाप–फलानि यदृच्छया।

उत्तरम्– यगण मगण नगण सगण भगण ल.गु

1. महिम्नामेतस्मिन् विनयशिशिरो मौग्ध्यमसृणोः।

छन्द का नाम– शिखारिणी छन्दः

नगण भगण भगण रगण

इतर पाप–फलानि यदृच्छया।

CBEO BHINDER

**छन्द का नाम– द्रुतविलम्बितम्।**

**प्र.18 इन्द्रवज्रा छन्दसि कति वर्णाः भवन्ति?**

**उतरम्–एकादशवर्णाः भवन्ति।**

**प्र.19 वर्णानाम उच्चारणकालः किम् उच्यते ?**

**उत्तरम्– मात्रा इति उच्यते।**

# अलंकार

**प्रदत्तविकल्पेभ्यः उत्तरं चित्वा लिखत–**

**प्रश्नः–1 'अलङ्कारः' शब्दस्य तात्पर्योऽस्ति–**

(1) अलंकरो इति अलंङकारः।

(2) अलंकृतिरलङ्कारः।

(3) अलंक्रियते अनेन इति अलङ्कारः।

(4) सर्वे (3)

**प्रश्नः–2 अलङ्कारसम्प्रदायस्य प्रवर्तकः आचार्य कः ?**

(1) भरतमुनिः (2) दण्डी

(3) भामहः (4) विश्वनाथः (3)

**प्रश्नः–3 उपमा अलंकारे भवति–**

(1) उपमानोपमेययोः प्रस्फुटं सुन्दरं साम्यम्।

(2) गूढं वैकृतिकं साम्यम्।

(3) कश्चित् विचित्रं साम्यम्।

(4) अस्पष्टं प्राकृतिकं साम्यम्। (1)

**प्रश्नः–4 'नवपलाशपलाशवनं पुरः स्फुटपरागपरागतपंकजम्।' इत्यत्र कोऽलंकारः ?**

(1) श्लेषः (2)उपमाः

CBEO BHINDER

(3) रूपकम्　　　(4) यमकम्　　　(4)

**प्रश्नः–5 कस्मिन्नलंकारे प्रायः, मन्ये, शंके, ध्रुवम् इत्यादयाः शब्दाः प्रयुज्यन्ते ?**

(1) यमकम　　　(2) उपमायाम्

(3) रूपके　　　(4) उत्प्रेक्षायाम्　　　(4)

**लघूत्तरात्मक प्रश्नाः–**

**प्रश्नः–1 काव्यादर्शस्य रचयिता दण्डिनानुसारेण अलङ्कारस्य स्वरूपं भवति।**

उत्तरम्– काव्यशोभाकारान् धर्मान् अलङ्कारान् प्रचक्षते।

**प्रश्नः–2 'स्तम्बेन नीवार इवावशिष्टः अस्मिन् वाक्ये अलंकारः वर्तते ?**

उत्तरम्– उपमा अलङ्कारः अस्ति।

**प्रश्नः–3 ''पादं सुमेरोरिव वज्रभिन्नम्'' अस्मिन् वाक्ये अलंकारः वर्तते ?**

उत्तरम्– उपमा अलङ्कारः अस्ति।

**प्रश्नः–4 ''वटुपरिषदं पुण्यश्रीकः श्रियैव सभाजयन्'' इत्यत्र अलङ्कार वर्तते ?**

उत्तरम्– उत्प्रेक्षा अलंकारः वर्तते।

**प्रश्नः–5 अयोधातुं यद्वप्परिलघुरयस्कान्तः शकलः इत्यत्र अलङ्कार वर्तते।**

उत्तरम्– उपमा अलङ्कारः अस्ति।

**प्रश्नः–6''कुवलयदलस्निग्धश्यामः'' अस्मिन् वाक्ये अलंकारः वर्तते ?**

उत्तरम्– उपमा अलङ्कारः वर्तते।

**प्रश्नः– 7 ''संवृति प्रतिबिम्बतेव निखिला सैवाकृतिः सा द्युतिः'' इति पद्यांशे अलङ्कारः वर्तते ?**

उत्तरम्– उत्प्रेक्षा अलंकारः वर्तते।

**प्रश्नः–8 '' क्षीयन्ते खलु भूषणानि सततं वाग्भूषणं भूषणम्'' इति पद्यांशे अलङ्कारः वर्तते ?**

उत्तरम्– यमक अलङ्कारः वर्तते।

**प्रश्नः–9 ''सहसा विदधीत न क्रियामविवेकः परमापदां पदम्'' अस्मिन् पद्यांशे अलङ्कार वर्तते ?**

उत्तरम्– अर्थान्तरन्यासः अलङ्कारः वर्तते।

**प्रश्नः–10 ''शब्दार्थौः सत्कविरिव द्वयं विद्वानपेक्षते'' अस्मिन् पद्यांशे अलङ्कार वर्तते ?**

उत्तरम्– उपमा अलङ्कारः वर्तते।

CBEO BHINDER

**प्रश्नः—11 रमते न मरालस्य मानसं—मानसं विना'' अस्मिन् पद्यांशे अलङ्कार वर्तते ?**

उत्तरम्— यमक अलङ्कारः वर्तते।

**प्रश्नः—12 ''निजहृदि विकसन्तः सन्ति सन्तः कियन्तः'' अस्मिन् पद्यांशे अलङ्कार वर्तते ?**

उत्तरम्— अनुप्रास अलङ्कारः वर्तते।

**प्रश्नः—13 ''सिन्दूरद्रवस्नातानामिव वरूणदिगवलम्बिनाम्'' अस्मिन् पद्यांशे अलङ्कार वर्तते ?**

उत्तरम्— उत्प्रेक्षा अलंकारः वर्तते।

**प्रश्नः—14 अस्ति यद्यपि सर्वत्र नीरं नीरज—राजितम् इत्यत्र अलङ्कारः वर्तते ?**

उत्तरम्— अनुप्रास अलङ्कारः वर्तते।

**प्रश्नः—15 अधोलिखितपरिभाषासु रिक्तस्थानपूर्तिः कार्याः**

(1) अनुप्रास.......................................................वैषम्येऽपि स्वरस्य यत्। **(शब्दसाम्यम्)**

(2) सत्यर्थे ......................................... स्वर—व्यंजन—संहतेः। **(पृथगर्थायाः)**

(3) .......................... तेनैवावृत्तिर्यमकं विनिगद्यते। **(क्रमेण)**

(4)दृष्टान्तस्तु...........................................वस्तुनः प्रतिबिम्बनम्। **(सधर्मस्य)**

(5)............................. पदैरनेकार्थाभिधाने श्लेष इष्यते। **(श्लिष्टैः)**

(6) ................................ साम्यमुपमेत्यभिधीयते। **(प्रस्फुटं सुन्दरं)**

प्रश्नः—16 रूपक अलङ्कारस्य लक्षणं लिखत।

उत्तरम्— तद्रूपकमभेदो यः उपमानोपमेययोः

प्रश्नः—17 उत्प्रेक्षा अलङ्कारस्य लक्षणं लिखत।

उत्तरम्— ''सम्भावनमथोत्प्रेक्षा प्रकृतस्य समेन यत्।''

प्रश्नः—18 यमक अलङ्कारस्य लक्षणं लिखत।

उत्तरम्— '' सत्यर्थे पृथगर्थायाः स्वरव्यंजन संहतेः।

क्रमेण तेनैवावृत्तिर्यमकं विनिगद्यते।।''

प्रश्नः— 19 उपमा अलङ्कारस्य लक्षणं लिखत।

उत्तरम्— प्रस्फुटं सुन्दरं साम्यमुपमेत्यभिधीयते।

प्रश्नः—20 कुंचित—कुचितैः कच—कलापैः कमनीय—कपोलपालिः अनुचरः तोरणदुर्गं प्रयाति। अस्मिन् वाक्ये अलङ्कारः वर्तते।

CBEO BHINDER

उत्तरः–अनुप्रासः अलंङ्कारः वर्तते।

# अपठित–अववोधनम्

**01.अपठितगद्यांशः**

**अधोलिखितान गंद्याशन–पठित्वा एतदाधारितानां प्रश्नानाम् उत्तराणि यथा निर्देशं लिखत–**

अयम् अस्मांक भारत देशः अस्ति। यत्र भरतनामकः राजा वसति स्म। तस्य सम्बधात् अस्य नाम भारतम् इति। अस्य उत्तरस्यां दिशि हिमालयः पर्वतः दक्षिणस्याम् च हिन्द महासागरः अस्ति। अत्र गंगायमुना सरयूगोदावरी प्रभृतयः देवनद्यः प्रवहन्ति, यासां जलेन भारतभूमिः शस्यश्यामला अस्ति।

विविधतायाम् एकता भारतस्य विशेषता अस्ति। अस्माकं राष्ट्र ध्वजः त्रिवर्णात्मकः। राष्ट्रीयवाक्यम्–''सत्यमेव जयते नानृतम्'' राष्ट्रीय चिन्ह्म् सिंहशीर्षम, राष्ट्रगीतं, राष्ट्रभाषा च अस्य राष्ट्रीयतायाः मुख्यधाराः सन्ति। संस्कृतभाषा एव अस्य प्राचीनतमा भाषा अस्ति। अस्य देशस्य गौरवम् प्राचीनम् अस्ति। ज्ञानविज्ञाने अयं देशः विश्वगुरुः इति कथ्यते। भारतस्य उन्नत्यै एव अस्माकं समयस्य धनस्य च अधिकतमः उपयोगः भवेत् इति अस्मांक संकल्पः प्रत्येकः नागरिकः भारतदेशस्य विकासाय प्रयत्नशीलो भवेत्। यतोहि–

''जननी जन्मभूमिश्च स्वर्गादपि गरीयसी।''

प्रश्नाः

1. कस्य सम्बधात् अस्य नाम भारतम् अस्ति ? (एकपदेन उत्तरत)
   उत्तर– भरत नामकस्य राज्ञः।
2. भारतस्य कस्यां दिशि हिमालयः पर्वतः वर्तते।
   उत्तर– उत्तारस्याम् ।
3. अस्मांक राष्ट्र ध्वजः कीदृश ?

CBEOBHINDER

उत्तर– त्रिवर्णात्मकः।

4. ज्ञान विज्ञाने भारत देशः कः कथ्यते ?

उत्तर–विश्वगुरुः ।

5. भारतस्य विशेषता का अस्ति ?

उत्तर– विविधतायाम् एकता भारतस्य विशेषता अस्ति।

6. अत्र काः नद्यः प्रवहन्ति ?

उत्तर–अत्र गंगायमुनासरयूगोदावरी प्रभृतयः देवनद्यः प्रवहन्ति।

7. अस्माकं राष्ट्रीय वाक्यं किमस्ति ?

उत्तर– अस्माकम् राष्ट्रीयवाक्यम् सत्यमेव जयते नानृतम् 'इति अस्ति।

8. देवनद्यः ''इति कर्तृपदस्य क्रिया पदं किम् प्रयुक्तम्।

उत्तर–प्रवहन्ति।

9. प्राचीनतमा ''इति विशेषणस्य विशेष्यपदं किम् ?

उत्तर– भाषा।

10.तस्य सम्बन्धात– अत्र ''तस्य'' इति सर्वनाम पदस्थाने संज्ञापदं किम् ?

उत्तर– भरत राज्ञः।

11.असत्यम्'' इति पदस्य विलोमपदमत्र किम् प्रयुक्तम् ?

उत्तर–सत्यम्।

12.उपर्युक्त गद्यांशस्य समुचितं शीर्षकं लिखत ?

उत्तर–अस्माकं भारत देशः

2.अपठितगंद्यांशः

सर्वासु भाषासु संस्कृतभाषा प्राचीनतमा भाषा अस्ति। या परिष्कृता, परिशुद्धा दोषरहिता भाषा सा संस्कृत भाषा इति कथ्यते। विश्वस्य प्राचीनतमाः– चतुर्वेदाः पुराणानि रामायणम्, महाभारतम च अस्यामेव भाषायाम् लिखिताः सन्ति। भारतस्य सांस्कृतिकं महत्वम् अस्यामेव भाषायाम् सुरक्षितम् अस्ति। अनया भारतम् एकतायाः सूत्रे निबद्धम्। संस्कृत भाषायाः साहित्यम् समुद्रवत व्यापकम्। संस्कृतस्य व्याकरणम् अद्वितीयम् अस्ति। अस्माकं संस्कृतिः अस्यामेव प्रतिबिम्बिता वर्तते।

CBEO BHINDER

सर्वकारेणापि संस्कृत भाषाध्ययनं अनिवार्यं कृतम्। वर्तमाने भौतिके युगे जीवनोपयाोगिनां वस्तूनां कर्तव्याकर्तव्यज्ञानस्य, धर्म–अर्थ–काम–मोक्षाणां, नैतिकी–शिक्षायाः ज्ञानस्य च आवश्यकता वर्तते। ''रामवत् व्यवहारं कुरू न तु रावणादिवत् इति।'' अतः संस्कृतसाहित्यम् अस्मभ्यं व्यवहारिकीं नैतिकीं शिक्षां ददाति। सम्प्रति सर्वत्रापि अनुशासनहीनता, स्वार्थपरता चरित्रहीनता च दृश्यते, एतत् सर्वं, संस्कृत भाषा एव दूरीकर्तुं सक्षमा। अस्माभिः संस्कृतं पठनीयम्। स्वसंस्कृतेः ज्ञानार्थं संस्कृतज्ञानम् आवश्यकं वर्तते। अस्माकं कर्तव्यमस्ति यत् संस्कृतस्य प्रचारे–प्रसारे अधिकतमं प्रयत्नं कुर्याम।

प्रश्नाः

1. सर्वासु भाषासु का प्राचीनतमा भाषा अस्ति ? (एक पदेन उत्तरत)

   उत्तर– संस्कृत भाषा।

2. समुद्रवत् किम् व्यापकम् ?

   उत्तर– संस्कृत साहित्यम्।

3. संस्कृतस्य व्याकरणम् कीदृशम् अस्ति ?

   उत्तर– अद्वितीयम्।

4. केन संस्कृत भाषाध्ययनं अनिवार्यं कृतम्?

   उत्तर– सर्वकारेण।

5. संस्कृत भाषा कां कथ्यते ? (पूर्ण वाक्येन उतरत)

   उत्तर–परिष्कृता, परिशुद्धा दोषरहिता भाषां इति ''संस्कृत भाषा'' ।

6. अस्माकं कर्तव्यं किमस्ति ?

   उत्तर– अस्माकं कर्तव्यम अस्ति यत् संस्कृतस्य प्रचार–प्रसारे अधिकतमं प्रयत्नं कुर्याम।

7. किमर्थं संस्कृत ज्ञानम् आवश्यकं वर्तते ?

   उत्तर–स्व संस्कृतेः ज्ञानार्थं संस्कृत ज्ञाम् आवश्यकं वर्तते।

8. 'शिक्षां ददाति'– अत्र ददाति' क्रियायाः कर्तृपदं किं प्रयुक्तम् ?

   उत्तर–संस्कृत साहित्यम्।

9. ''प्राचीनतमा भाषा''– इत्यनयोः पदयोः विशेषण पदं किम्?

   उत्तर–प्राचीनतमा।

CBEO BHINDER

10. ''अनया भारतम्''–अत्र अनया 'इति सर्वनाम स्थाने संज्ञापदं किम् ?

उत्तर–संस्कृत भाषया ।

11. ''रामवत्'' इति पदस्य विलोमपदं चित्वा लिखत।

उत्तर–रावणवतः।

12. उपर्युक्त गद्यांशस्य समचितं शीर्षकं लिखत्।

उत्तर–''संस्कृत भाषायाः महत्वम् ।''

03.अपठितगंद्यांशः

प्राचीनकालादारम्भ्य भारतवर्षे अनेके कवयः अभवन् वर्तमान युगेऽपि शतशः कवयः प्रसिद्धाः सन्ति। वाल्मीकि काव्यक्षेत्रे प्रसिद्धः बाण भट्टः गद्यकाव्यक्षेत्रे विख्यातः भासभवभूतिश्च नाट्यक्षेत्रे प्रसिद्धोस्तः परन्तु महाकवि कालिदासः सर्वक्षेत्रेषु सर्वोत्तमः विद्यते।

विश्वेऽस्मिन् न कोऽपि देशो प्रान्तो वा विद्यते यत्रत्याः जनाः कालिदासं न विदन्ति। भारतीयेषु कविषु कालिदासः एवं भूयसि कीर्तिम् अलभत् आनन्दवर्धनाचार्यः कालिदासं महाकविः आह। प्रसन्नराघवस्य कर्ता जयदेवस्तं' कविकुलगुरुः कालिदासो विलासः अकथयत्। कविकुलगुरुः महाकवि कालिदासः संस्कृतसाहित्यस्य अद्यावधि कनिष्ठिकाधिष्ठितकविरस्ति।

कालिदासकृत–ग्रन्थेषु रघुवंश कुमारसंभवश्चेति द्वे महाकाव्ये मेघदूत–ऋतुसंहारमिति खण्डाकाव्यद्वयम। मालविकाग्निमित्रं, विक्रमोर्वशीयं अभिज्ञाशाकुन्तालदीनि त्रीणि नाटकानि। एषु ग्रन्थेषु रघवंशमहाकाव्यं यथा चरित्र वर्णन दृष्टया गौरवान्वितं स्वीक्रियते, तथैव अभिज्ञानशाकुन्तलं नाम नाटक समस्तेऽपि नाट्यसाहित्ये सर्वोत्कृष्टं स्थानं लभते। उपमा क्षेत्रे तु कालिदासः अद्वितीयः कविरस्ति। वस्तुतः संस्कृत साहित्याकाशे कालिदासः दैदीप्यमानं नक्षत्रमिव शोभते।

प्रश्नाः

प्र.1 कः गद्यकाव्यक्षेत्रे विख्यातः ? (एक पदेन उतरत)

उत्तर– बाण भट्टः ।

प्र.2 वाल्मीकि कस्मिन क्षेत्रे प्रसिद्ध ?

उतर– काव्यक्षेत्रे ।

प्र.3 सर्वेषु क्षेत्रेषु सर्वोत्तमः कः विद्यते ?

उतर– महाकविः कालिदासः।

CBEO BHINDER

प्र.4 कः कालिदासं महाकविः आह?

उतर– आनन्दवर्धनाचार्यः ।

प्र.5 कालिदासकृत द्वे महाकाव्ये के स्तः ?

उतर–कालिदासकृतं द्वे महाकाव्ये रघुवंश कुमारसम्भवञ्चेति स्तः।

प्र.6 महाकवि कालिदासः अद्यावधि कीदृशः कविरस्ति?

उतर– महाकवि कालिदासः संस्कृत साहित्यस्य अद्यावधि कनिष्ठिकाधिष्ठित कविरस्ति।

प्र.7 संस्कृत साहित्याकाशे कालिदासः कथं शोभते ?

उतर–संस्कृत साहित्याकाशे कालिदासः दैदीप्माननक्षत्रमिव शोभते।

प्र.8 अभवन् इति क्रियायाः कर्तृपदं किम् ?

उतर– कवयः।

प्र.9 कविकुलगुरुः इति कस्य विशेषणं वर्तते ?

उतर– कालिदासस्य।

प्र.10 जयदेवस्तम् अत्र'' इति सर्वनाम स्थाने संज्ञा पदं किम् ?

उतर– कालिदासम्।

प्र.11 ''द्वितीय'' इति पदस्य विलोम पदं चित्वा लिखत्?

उतर– अद्वितीयः

प्र.12 उपर्युक्त गंद्याशस्य समुचितं शीर्षकं लिखत् ?

उतर– महाकवि कालिदासः।

**04.अपठितगद्यांशः**

वृक्षाः भूमौउद्भवन्ति । वृक्षाः अपि मनुष्य इव भुक्त्वा पीत्वा च जीवन्ति । मूलानि वृक्षाणां मुखानि भवन्ति। ते पादैः जलं पिबन्ति अत एव पादपाः कथ्यन्ते। तेषां मूलानि भूमितः रसं ग्रहीत्वा सर्वेषु अवयवेषु नयन्ति, तेन ते प्रवर्धन्तेः पुष्पन्ति, फलन्ति। वृक्षाः अपि शीतातपैः प्रभाविताः भवन्ति। तेऽपि सुखानि दुःखानि च अनुभवन्ति । तेषु अपि प्राणाः भवन्ति, अतएव ते प्राणिनः इव जायन्ते, वर्धन्ते, पुष्पन्ति, फलन्ति, म्रियन्ते च । ते कदापि खगमृगजलचरनराः इव न विचरन्ति अतः अचराः कथ्यन्ते। बहूपकुर्वन्ति वृक्षाः प्राणिनाम्।

CBEO BHINDER

वृक्षाः अशरणानां शरणम् बुभूक्षितानां भोजनं, संतप्तानां समाश्रयाः, वृष्टिकारकाः सन्ति । वृक्षारोपणं–वृक्षरक्षणं च अस्माकं रक्षायै परमावश्यकम्।

1. वृक्षाणाम् मुखानि कानि भवन्ति? (एक पदेन उत्तरम्)

उतरम्– मूलानि ।

2. वृक्षाः कुत्र उद् भवन्ति ?

उतरम्–भूमौ ।

3. के अपि शीतातपैः प्रभाविता भवन्ति

उतरम्– वृक्षाः।

4. वृक्षाः प्राणीनाम् कृते किं कुर्वन्ति ?

उतरम्– बहूपकुर्वन्ति

5. के पादपाः कथ्यन्ते (पूर्ण वाक्येन उतरत्त)

उतरम्– वृक्षा पादपाः कथ्यन्ते।

6. तेषां मूलानि भूमितः किं ग्रहन्ति?

उतरम्– तेषां मूलानि भूमितः रसं ग्रहन्ति।

7. वृक्षाः कदापि कैः इव न विचरन्ति?

उतरम्– वृक्षाः कदापि खगमृगजलचरनराः इव न विचरन्ति।

8. बहूपकुर्वन्ति वृक्षाः प्राणीनाम्। इत्यस्मिन वाक्ये ''उपकुर्वन्ति'' इति क्रिया पदस्य कर्तृपदं किं?

उतरम्– वृक्षाः

9. तेषु अपि प्राणाः भवन्ति। अस्मिन् वाक्ये 'तेषु' इति सर्वनामपदं कस्य संज्ञा पदस्य स्थाने प्रयुक्तम्?

CBEO BHINDER

उतरम्–''वृक्षेषु'' इति स्थाने।

10. ''चराः'' इत्यस्य विलोमपदं गद्यांशांत् चित्वा लिखत।

उतरम्–अचराः।

11. वृक्षाः वृष्टिकारकाः सन्ति। इत्यत्र विशेष्य पदं किं?

उतरम्– वृक्षाः।

12. गद्यांशस्य समुचितं शीर्षकं लिखत।

उतरम्– वृक्षाणां महत्वम् ।

## लघु निबन्ध लेखनम्

### संस्कृत भाषायाः महत्वम्

संस्कृत भाषा विश्वस्य प्राचीनतमा भाषा अस्ति। प्राचीन काले इयं जनासाधारणस्य भाषा आसीत्। तदा सर्वे जनाः संस्कृतम् एव वदन्ति स्म। संस्कृत भाषा सर्वाः भाषा : शब्द दानेन पोषयति। अतः संस्कृत भाषा सर्वासां भाषाणं जननी अस्ति। भारतीया संस्कृतिः अस्याम् एव भाषायाम् सुरक्षिता अस्ति। ये एतां ''मृत भाषा '' इति कथयन्ति ते एव मृताः सन्ति। ते अस्याः भाषायाः महत्वं न जानन्ति। अस्माकम् वेदा पुराणानि महाकाव्यानि अस्यां भाषायाम् एव सन्ति। अतः अस्माभिः अस्याः प्रचारः प्रसारः च कर्त्तव्यः।

### विद्यालस्य वार्षिकोत्सवः

अस्माकम् विद्यालयः राजकीयः विद्यालयः अस्ति। अत्र पठनस्य तु श्रेष्ठा व्यवस्था अस्ति एव युगपदेव क्रीड़ानामपि सुलभा व्यवस्था अस्ति। अतएव अस्माकम् विद्यालयस्य सर्वासां कक्षाणां परिणामः शतप्रतिशतं भवति। क्रीड़ाप्रतियोगितासु अपि अस्माकं विद्यालयस्य छात्राः बहून् पुरस्कारान् लभन्ते। अस्माकम् विद्यालयस्य **वार्षिकोत्सवः** गतसप्ताहेः सम्पन्नो जातः। अस्माकं प्रदेशस्य राज्यपालः मुख्यः अतिथिः आसीत्।

### मम ग्रामः

मम ग्रामः उदयपुरस्य समीपं वर्तते। मम ग्रामस्य नाम सुन्दरम् वर्तते। अस्य ग्रामस्य समीपे क्षेत्राणि सन्ति। क्षेत्रेषु कृषकाः अन्नम् उत्पादयन्ति। मम ग्रामस्य जलवायुः शुद्धं स्वास्थ्यवर्द्धकं च अस्ति। ग्रामं परितः वृक्षाः

CBEO BHINDER

उपवनानि च सन्ति। अस्य ग्रामस्य जनानां जीवनम् अति सरलम् अस्ति। ते परिश्रमशीलाः सन्ति। ग्रामे एका भव्या पाठशाला अस्ति। अत्र ग्रामस्य बालकाः बालिकाश्च सदैव पठन्ति वस्तुतः अयम् आदर्श ग्रामः अस्ति।

### अस्माकं विद्यालयः

अस्माकम् विद्यालयः नगरात् बहिः रम्यप्रदेशे अस्ति। अस्य नाम राजकीयः उच्च माध्यमिकः विद्यालय अस्ति। अस्माकं विद्यालये पञ्चदश अध्यापकाः पञ्चशतं छात्र–छात्राश्च सन्ति। सर्वे अध्यापकाः विविध विषयेषु निपुणाः सन्ति। अध्ययने तत्पराः छात्राः क्रीडायाम् अपि कुशलाः सन्ति। कन्दुकक्रीडायाम् अस्माकं विद्यालयः प्रथमम् अस्ति। विद्यालयं परितः एकं रमणीयकम् उद्यानम् अस्ति। अयं विद्यालयः साक्षात् देवमंदिरम् एव अस्ति

### विद्यायाः महत्वम्

विद्याधनं प्रधानं धनम् अस्ति। पुण्यं पापम् इति ज्ञातं विद्यया एव भवति। स्व कर्तव्यज्ञानम् अपि विद्यया एवं भवति। विद्या मनुष्याय विनयं ददाति। विनयात् मानवः पात्रतां याति। पात्रत्वात् च मनुष्यः धनं प्राप्नोति। विद्या मनुष्यस्य सुन्दररूपम् अस्ति विद्यारहितः पुरुषः साक्षात् पशुः एव भवति। विद्या दानेन वर्धते संचयात् च नश्यति। अतः विद्या अपूर्व श्रेष्ठं च धनम् अस्ति।

## अनुवाद कार्य

- 1.मैं असत्य नहीं बोलता हूँ।– अहम् असत्यं न वदामि।
- 2.छात्र विद्यालय में खेलते हैं।–छात्राः विद्यालये क्रीडन्ति।
- 3.तुझे सदा सत्य बोलना चाहिए।–त्वं सदा सत्यं वदेः।
- 4.छात्र शिक्षक से व्याकरण पढता है। – छात्रः शिक्षकात् व्याकरणं पठति ।
- 5.राम पत्र लिखता है। – रामः पत्रं लिखति ।
- 6.वृक्ष से पत्ता गिरता है । – वृक्षात् पत्रं पतति ।
- 7.गांव के दोनों ओर वृक्ष है । – ग्रामम् अभितः वृक्षाः सन्ति ।
- 8.जहां नारियां पूजी जाती है, वां देवता निवास करते है। – यत्र नार्यस्तु पूज्यन्ते रमन्ते तत्र देवताः ।
- 9.गंगानदी हिमालय से प्रकट होती है । – गंगानदी हिमालयात् प्रभवति ।
- 10.छात्र कवि में कालिदास श्रेष्ठ है।– कविषु कालिदासः श्रेष्ठः ।
- 11.छात्र शिक्षक से व्याकरण पढता है। – छात्रः शिक्षकात् व्याकरणं पठति ।
- 12. याचक राजा से धन मांगता है।– याचकः नृपं धनं याचते ।
- 13. या मुनि मोक्ष के लिए ईश्वर को भजता है।– मुनिः मोक्षाय ईश्वरं भजति ।
- 14. गंगा हिमालय से निकालकर आती है– गंगा हिमालयात् निर्गत्य आगच्छति ।
- 15. गोपाल पढने से प्रमाद करता है – गोपालः पठनात् प्रमाद्यति ।
- 16.राजा निर्धन का धन देता है।– राजा निर्धनेभ्यः धनं ददाति ।
- 17. विद्या सत्य से शोभित होती है ।– विद्या सत्येन शोभते ।
- 18. पिता पुत्र से स्नेह करता है ।– पिता पुत्रे स्निह्यति ।

- 19. मेरी ईश्वर में श्रद्धा और निष्ठा है।– मम ईश्वरे श्रद्धा निष्ठा च स्तः।
- 20. मैं इस समय अध्ययन में लगा हुआ हूँ।– अहम् अस्मिन् समये अध्ययने लग्नोऽस्मि।
- 21. वह मेरे साथ बाजार जायेगा ।– सः मया सह आपणं गमिष्यति ।
- 22. तुम उसके साथ खेलो ।– त्व तेन सह क्रीड ।
- 23. पिता पुत्र के साथ बाजार जाता है।– पिता पुत्रेण सह आपणं गच्छाति।
- 24. सज्जन स्वभाव से सरल होता है। – सज्जनः स्वभावेन सरलः भवति।
- 25. जननी जन्मभूमि स्वर्ग से बढकर है।– जननी जन्मभूमिश्च स्वर्गादपि गरीयसी।
- 26. सत्संगति के समान इस संसार में कुछ भी नहीं है।– सत्संगतितुल्यं अस्मिन् संसारे किमपि नास्ति ।
- 27. रमेश कल घर जाकर पढेगा ।– रमेशः श्वः गृहं गत्वा पठिष्यति ।
- 28. हम अपने राष्ट्र की रक्षा करें – वयं स्वराष्ट्रं रक्षामहे ।
- 29. मन सत्य से पवित्र होता है।– मनः सत्येन पवित्रं भवति ।
- 30. हम अपने राष्ट्र की रक्षा करें – वयं स्वराष्ट्रं रक्षामहे ।
- 31. वह चावल से भात बनाता है।– सः तण्डुलान् ओदनं पचति ।
- 32. दुर्जन को धिक्कार है ।– धिक् दुर्जनम् ।
- 33. वह पैर से लंगड़ा है ।– सः पादेन खञ्जः अस्ति ।
- 34. अध्यापक शिष्यों से प्रश्न पूछता है ।– अध्यापकः शिष्यान् प्रश्नं पृच्छति।
- 35.राम वन को जाता है। – रामः वनं गच्छति ।
- 36. कक्षा कमें कोलाहल मत करो ।– कक्षायां कोलाहलं मा कुरु ।
- 37. वह जटाओं से तपस्वी लगता है ।– सः जटाभिः तापसः प्रतीयते ।
- 38. राजा ब्राह्मण को गाय देता है । राजा विप्राय गां ददाति ।
- 39. मैं प्रतिदिन विद्यालय जाताहूँ।– अहं प्रतिदिनं विद्यालयं गच्छामि ।
- 40. प्रातः सूर्य अगता है ।– प्रातः सूर्य उदेति ।
- 41. सब सुखी हो । – सर्वे भवन्तु सुखिनः ।
- 42. राम ने रावण को मारा । रामः रावणं मारितवान् ।
- 43. विद्या विनय प्रदान करती है।– विद्या ददाति विनयम् ।
- 44. बच्चे मैदान में खेलते है। – छात्राः क्रीडाक्षेत्रे क्रीडन्ति।
- 45. हम सब मन्दिर जाते है – वयं मन्दिरं गच्छामः।
- 46. बालक विद्यालय जाता है। - बालकः विद्यालयं गच्छति।
- 47. झरने से अमृत को मथता है। - सागरं सुधां मथ्नाति।
- 48. राम के सौ रुपये चुराता है। - रामं शतं मुष्णाति।
- 49. राजा से क्षमा माँगता है। - नृपं क्षमां याचते।
- 50. सज्जन पाप से घृणा करता है। - सज्जनः पापाद् जुगुप्सते।
- 51. विद्यालय में लड़के और लड़कियाँ है। - विद्यालये बालकाः बालिकाश्च वर्तन्ते।
- 52. मैं कंघे से बाल सँवारता हूँ। - अहं कंकतेन केशप्रसाधनं करोमि।
- 53. बालिका जा रही है। - बालिका गच्छन्ती अस्ति।
- 54. यह रमेश की पुस्तक है। - इदं रमेशस्य पुस्तकम् अस्ति।
- 55. बालक को लड्डू अच्छा लगता है। - बालकाय मोदकं रोचते।
- 56. माता-पिता और गुरुजनों का सम्मान करना उचित है। - पितरौ गुरुजनाश्च सम्माननीयाः।
- 57. विद्यालय के चारों ओर वृक्ष है। –विद्यालयं परितः वृक्षाः सन्ति ।

- 58. वह वानर वृक्ष से उतरकर नीचे बैठा है। - वानरः वृक्षात् अवतीर्य्य नीचैः उपविष्टोऽस्ति।
- 59. मेरी सब आशाओं पर पानी फिर गया। - सर्वा ममाशा मोघाः सञ्जाताः।
- 60. मैने सारी रात आँखों में काटी। - पर्यङ्के निषण्णस्य ममाक्ष्णोः प्रभातमासीत्।
- 61. गुरु से धर्म पूछता है। - उपाध्यायं/गुरुं धर्मं पृच्छति।
- 62. बकरी का दूध दुहता है। - अजां दुग्धं दोग्धि।
- 63. मन्दिर के चारों ओर भक्त है। - मन्दिरं परितः भक्ताः सन्ति।
- 64. इस आश्रम में ब्रह्मचारी, वानप्रस्थी और संन्यासी हैं। - ब्रह्मचारिणः वानप्रस्थाः संन्यासिनश्च अस्मिन् आश्रमे सन्ति।
- 65. नाई उस्तरे से बाल काटता है। - नापितः क्षुरेण केशान् वपति।
- 66. रंगरेज वस्त्रों को रंगता है। - रज्जकः वस्त्राणि रञ्जयति।
- 67. मन सत्य से शुद्ध होता है। - मनः सत्येन शुध्यति।
- 68. आकाश में पक्षी उड़ते हैं। - वियति (आकाशे) पक्षिणः उड्डीयन्ते।
- 69. कुम्भ पर्व में भारी जन सैलाब देखने योग्य है। - कुम्भपर्वणि प्रचुरो जनसञ्चारः दर्शनीयः।
- 70. विद्याविहीन मनुष्य और पशुओं में कोई भेद नहीं है। - विद्याविहीनानां नराणां पशूनाञ्च कोऽपि भेदो नास्ति।

# कारकाणि

## अधस्तनेषुरेखाङ्‌्कितशब्देषु विभक्तेः कारणंलिखत

1. ग्रामम् परितः क्षेत्राणि सन्ति।

उत्तर परितः योगे द्वितीया विभक्तिः भवति।

2. कविषु कालिदासः श्रेष्ठः।

उत्तर 'इष्टन्' अथवा 'तमप्' प्रत्ययस्य योगे यस्मात् च विशेषताप्रदर्शयतेतस्मिन् षष्ठीविभक्तेः अथवा सप्तमीविभक्तेः प्रयोगः भवति।

3. कृषकः ग्रामम् अजां नयति।

उत्तर द्विकर्मकधातोः योगे द्वितीयाविभक्तिः भवति।

4. हरिः वैकुण्ठम् अधिशेते। श्यामः नगरम् उपवसति।

उत्तर उप, अधि–उपसर्गपूर्वक शीङ्. धातोः योगे द्वितीयाविभक्तिः भवति।

CBEO BHI

5. गोपालः धेनुं दुग्धं दोग्धि।

उत्तर द्विकर्मकधातोः योगे द्वितीयाविभक्तिः भवति।

6. क्रोशं कुटीला नदी।

उत्तर 'मार्गवाचीशब्दानां योगे द्वितीयाविभक्तिः भवति।

7. साधुः कर्णाभ्यां बधिरः अस्ति।

उत्तर ''येनाङ्ग विकारः'' विकृताङ्गे तृतीयाविभक्तिः भवति।

8. रामेण सुप्यते।

उत्तर कर्मवाच्यस्य कर्तरि तृतीयाविभक्तिः भवति।

9. धर्मेण हीनः पशुभिः समानः। जनकः पुत्रेण सह गच्छति

उत्तर हीनयोगे, सहयोगे च तृतीयाविभक्तिः भवति।

10. सुशीलः प्रकृत्या साधुः अस्ति।

उत्तर प्रकृति/स्वभाव योगे तृतीयाविभक्तिः भवति।

11. हरये रोचते भक्तिः

उत्तर रूच्यर्थानां धातूनां योगे चतुर्थीविभक्तिः भवति

12. रामः श्यामाय शतं धारयति

उत्तर धृञ् धातोः योगे उत्तमर्णे (ऋणदाता) चतुर्थीविभक्तिः भवति।

13. हनुमते नमः।

उत्तर नमः योगे चतुर्थीविभक्तिः भवति।

14. गङ्गा हिमालयात् प्रभवति।

उत्तर 'उद्गम' जन धातोः योगे पञ्चमीविभक्तिः भवति।

15. अल्पस्य हेतोर्बहुहातुमिच्छन् ।

उत्तर 'हेतु' योगे षष्ठीविभक्तिः भवति।

CBEO BHINDER

16. गोषु कृष्णा बहुक्षीरा।

उत्तर आधारयोगे सप्तमीविभक्तिः भवति।

17. अलम् विवादेन

उत्तर 'अलम्' पद योगे तृतीयाविभाक्तिः भवति।

18. पिता पुत्राय क्रुध्यति।

उत्तर क्रुध् योगे चतुर्थीविभक्तिः भवति।

19. दुर्जनः सज्जनाय ईर्ष्यति

उत्तर (ईर्ष्या)ईर्ष्य योगे चतुर्थीविभक्तिः।

20. गणेशाय स्वस्ति।

उत्तर 'स्वस्ति' 'स्वधा' योगेचतुर्थीविभक्तिः भवति।

21. सः मोक्षाय हरिं भजति

उत्तर प्रयोजनवाचिनि शब्दे चतुर्थीविभक्ति : भवति

22. वृक्षात् पत्राणि पतन्ति

उत्तर अपादाने 'पृथक' योगे पञ्चमीविभक्तिः भवति।

23. बालकः सिंहात् विभेति। नृपः दुष्टात् रक्षति/त्रायते।

उत्तर भयरक्षार्थानां धातूनां पञ्चमीविभक्तिः भवति।

24. शिष्यः उपाध्यायात् अधीते। छात्रः शिक्षकात् पठति।

उत्तर 'आखयातोपयोगे' पञ्चमीविभक्तिः भवति।

25. महेशः पापात् जुगुप्सते। कुलदीपः अधर्मात् विरमति। मोहनः अध्ययनात् प्रमाद्यति।

उत्तर जुगुप्सा–विराम–प्रमादर्थकानां धातूनां योगे पञ्चमीविभक्तिः भवति।

26. रामः श्यामात् पटुतरः अस्ति। माताभूमेः गुरुतरा अस्ति। जननी जन्मभूमिश्च स्वर्गात् अपि गरीयसी।

CBEO BHINDER

उत्तर यदा द्वयोः पदार्थयोः कस्यचित एकस्य पदार्थस्य विशेषता प्रदर्श्यते तथा विशेषणशब्दैः सह ईयसून् अथवा तरप् प्रत्ययस्य योगे पञ्चमीविभक्तिः भवति

27. सः अध्ययनेन वसति । विद्यया यशः वर्धते। विद्या विनयेन शोभते

उत्तर हेतुवाचिशब्दे तृतीयाविभक्तिः भवति।

28. बलदेवः स्वकार्ये संलग्नः अस्ति। जयदेवः संस्कृते चतुरः अस्ति।

उत्तर संलग्नार्थकचतुरार्थक शब्दानां योगेसप्तमीविभक्तिः भवति।

29. सुरेशः महेशस्य तुल्यः अस्ति।

उत्तर तुल्यवाचि शब्दानां योगे षष्ठीविभक्तिः भवति।

# प्रत्यय

| **प्रत्यय** | | | **सूत्र** |
|---|---|---|---|
| पठ् + तव्यत् | = | पठितव्यः | तव्यत्तव्यानीयरः |
| भू + तव्यत् | = | भवितव्यः | तव्यत्तव्यानीयरः |
| गम् + तव्यत् | = | गन्तव्यः | तव्यत्तव्यानीयरः |
| नी + तव्यत् | = | नेतव्यः | तव्यत्तव्यानीयरः |
| दश् + तव्यत् | = | द्रष्टव्यः | तव्यत्तव्यानीयरः |
| दा + तव्यत् | = | दातव्यः | तव्यत्तव्यानीयरः |
| कृ + तव्यत् | = | कर्तव्य | तव्यत्तव्यानीयरः |
| पच् + तव्यत् | = | पक्तव्यः | तव्यत्तव्यानीयरः |
| रक्ष् + तव्यत् | = | रक्षितव्य | तव्यत्तव्यानीयरः |
| भू + अनीयर | = | भवनीयः | तव्यत्तव्यानीयरः |
| पठ् + अनीयर | = | पठनीयः | तव्यत्तव्यानीयरः |
| भक्ष् + अनीयर | = | भक्षणीयः | तव्यत्तव्यानीयरः |

CBEO BHINDER

| | | | |
|---|---|---|---|
| गम् + अनीयर | = | गमनीयः | तव्यत्तव्यानीयरः |
| दृश् + अनीयर | = | दर्शनीयः | तव्यत्तव्यानीयरः |
| त्वज् + अनीयर | = | त्यजनीयः | तव्यत्तव्यानीयरः |
| कृ + अनीयर | = | करणीयः | तव्यत्तव्यानीयरः |
| लिख् + अनीयर | = | लेखनीयः | तव्यत्तव्यानीयरः |
| दा + अनीयर | = | दानीयः | तव्यत्तव्यानीयरः |
| पठ् + तुमुन् | = | पठितुम् | तुमुन्ण्वुलौ क्रियायां क्रियार्थायाम् |
| गम् + तुमुन् | = | गन्तुम् | तुमुन्ण्वुलौ क्रियायां क्रियार्थायाम् |
| क्रीड़ा + तुमुन् | = | क्रीडितुम् | तुमुन्ण्वुलौ क्रियायां क्रियार्थायाम् |
| नी + तुमुन् | = | नेतुम् | तुमुन्ण्वुलौ क्रियायां क्रियार्थायाम् |
| त्यज् + तुमुन् | = | त्यक्तुम् | तुमुन्ण्वुलौक्रियायां क्रियाथोनाम् |
| दृश् + तुमुन् | = | द्रष्टुम् | तुमुन्ण्वुलौक्रियायां क्रियाथोनाम् |
| चिन्त् + तुमुन् | = | चिन्तितुम् | तुमुन्ण्वुलौ क्रियायां क्रियार्थायाम् |
| कृ + तुमुन् | = | कर्तुम् | तुमुन्ण्वुलौ क्रियायां क्रियार्थायाम् |
| भू + तुमुन् | = | भवितुम् | तुमुन्ण्वुलौ क्रियायां क्रियार्थायाम् |
| श्रु + तुमुन् | = | श्रोतुम् | तुमुन्ण्वुलौ क्रियायां क्रियार्थायाम् |
| पठ् + शत् | = | पठन् | लटः शतृशानचावप्रथमा समानाधिकरणे |
| कृ + शत् | = | कुर्वन् | लटः शतृशानचावप्रथमा समानाधिकरणे |
| गम् + शत् | = | गच्छन् | लटः शतृशानचावप्रथमा समानाधिकरणे |
| हस् + शत् | = | हसन् | लटः शतृशानचावप्रथमा समानाधिकरणे |
| जि + शत् | = | जयन् | लटः शतृशानचावप्रथमा समानाधिकरणे |
| कथ् + शत् | = | कथयन् | लटः शतृशानचावप्रथमा समानाधिकरणे |

CBEO BHINDER

| | | | |
|---|---|---|---|
| दृश् + शतृ | = | पश्यन् | लटः शतृशानचावप्रथमा समानाधिकरणे |
| पाल् + शतृ | = | पालयन् | लटः शतृशानचावप्रथमा समानाधिकरणे |
| जीव् + शतृ | = | जीवन् | लटः शतृशानचावप्रथमा समानाधिकरणे |
| लिख् + शतृ | = | लिखन् | लटः शतृशानचावप्रथमा समानाधिकरणे |
| त्वज् + शतृ | = | त्यजन् | लटः शतृशानचावप्रथमा समानाधिकरणे |
| कृ + शानच् | = | कुर्वाणः | लटः शतृशानचावप्रथमा समानाधिकरणे |
| दा + शानच् | = | ददानः | लटः शतृशानचावप्रथमा समानाधिकरणे |
| सेव् + शानच् | = | सेवमानः | लटः शतृशानचावप्रथमा समानाधिकरणे |
| वृत् + शानच् | = | वर्तमानः | लटः शतृशानचावप्रथमा समानाधिकरणे |
| वृध + शानच् | = | वर्धमानः | लटः शतृशानचावप्रथमा समानाधिकरणे |
| एध् + शानच् | = | एधमानः | लटः शतृशानचावप्रथमा समानाधिकरणे |
| युध् + शानच् | = | युध्यमानः | लटः शतृशानचावप्रथमा समानाधिकरणे |
| शीङ् + शानच् | = | शयानः | लटः शतृशानचावप्रथमा समानाधिकरणे |
| ब्रू + शानच् | = | ब्रवाणः | लटः शतृशानचावप्रथमा समानाधिकरणे |
| याच् + शानच् | = | याचमानः | लटः शतृशानचावप्रथमा समानाधिकरणे |

कत्वा ल्यप् क्त क्तवतु प्रत्यय ज्ञानम्
प्रश्न 1 'क्तक्तवतु' प्रत्ययस्य सूत्रम् अस्ति –
उत्तर 'क्तक्तवतु निष्ठा।'

प्रश्न 2 क्त्वा प्रत्ययस्य सूत्रम अस्ति –
उत्तर 'समान कर्तृकयोः पूर्वकाले।''

प्रश्न 3 ल्यप् प्रत्ययः केन सूत्रेण भवति ?
उत्तर 'समासेऽनञ्पूर्वे कत्वो ल्यप्।' सूत्रेण

प्रश्न 4 सूत्र विर्देशपूर्वक– प्रकृतिप्रत्ययं पृथक पृथक कृत्वा लिखत –
उपगम्य, विहस्य, आनीय, विज्ञाय

CBEO BHINDER

पद प्रकृति प्रत्यय सूत्र
उपगम्य उप+गम् ल्यप् समासेऽनञ्पूर्वेक्त्वोल्यप्।
विहस्य वि+हस् ल्यप् समासेऽनञ्पूर्वेक्त्वोल्यप्।
आनीय आ+नी ल्यप् समासेऽनञ्पूर्वेक्त्वोल्यप्।
विज्ञाय वि+ज्ञा ल्यप् समासेऽनञ्पूर्वेक्त्वोल्यप्।

प्रश्न 5 प्रकृति प्रत्यय मेलनंकृत्वा सूत्रम् अषि लिखत –
प्रकृति प्रत्यय पदम् सूत्र
पठ्+क्त्वा पठित्वा समानकर्तृकयोः पूर्वकाले
गम् + क्त्वा गत्वा समानकर्तृकयोः पूर्वकाले
वद् + क्त्वा उक्त्वा समानकर्तृकयोः पूर्वकाले
कथ् + क्त्वा कथयित्वा समानकर्तृकयोः पूर्वकाले

प्रश्न 6 कृतः, मृतः, गतः, श्रुतः च एतेषु पदेषु क्त प्रत्यय केन सूत्रेण भवति ?
उत्तर 'क्तक्तवतु निष्ठा।' सूत्रेण

प्रश्न 7 पठितवान्, कृतवान, खादितवान, चलितवान च एतेषु पदेषु केन सूत्रेण क्तवतु प्रत्यय भवति –
उत्तर क्तक्तवतु निष्ठा इति सूत्रेण।

प्रश्न 8 प्रकृतिप्रत्ययं पृथक् पृथक् कृत्वा सूत्रम् लिखत –
पद प्रकृति प्रत्यय सूत्र
स्थितः स्था क्त क्तक्तवतु निष्ठा
आरब्धः आरभ् क्त क्तक्तवतु निष्ठा
दृष्टः दृश् क्त क्तक्तवतु निष्ठा
लब्धवान् लभ क्तवतु क्तक्तवतु निष्ठा
आप्तवान् आप् क्तवतु क्तक्तवतु निष्ठा

प्रश्न 9 प्रकृति प्रत्ययमेलनम् कृत्वा रिक्तस्थानं पूरयत –
क. तत् ....................राजा तूष्णीम् आसीत्। (श्रु+क्त्वा)
उत्तर श्रुत्वा
ख. भवान् यज्ञदक्षिणाकालं ........... समागतः (वि+अतिक्रम्+ ल्यप्)
उत्तर व्यतिक्रम्य

प्रश्न 10 उचितप्रत्ययपदं चित्वा रिक्तस्थानानि पूरयत
विचार्य, उपक्रान्तवान, स्थितः, दत्वा
क. इति एवं विचार्य सर्वेस्वदक्षिणं यज्ञं कर्तुम्
उपक्रान्तवान्।
ख. इति जलमध्ये पुष्पाञ्जलिम् दत्वा क्षणं स्थितः

CBEO BHINDER

प्रश्न 11 पूर्व कालिक प्रत्ययस्य नाम अस्ति
उत्तर क्त्वा च ल्यप् च

प्रश्न 12 क्त प्रत्ययं कस्य कालयस्य अर्थे प्रयुक्तः भवति ?
उत्तर भूतकालार्थे

प्रश्न 13 क्तवतु प्रत्ययं कस्य लकारस्य स्थाने प्रयुक्तः भवति।

उत्तर लङ्लकारस्य स्थाने

प्रश्न 14 'क्त्वा' प्रत्ययस्य कस्य वर्णस्य लोपः भवति
उत्तर क् वर्णस्य

प्रश्न 15 'क्त' प्रत्ययस्य कस्य वर्णस्य लोपः भवति
उत्तर क् वर्णस्य

।।शुभमस्तु ।।

CBEO BHINDER